# बीजाक्षरोपनिषत्

ॐ आप्यायन्त्विति शान्तिः।।

अं नित्यो व्यापकश्च आं सर्वाकर्षणशक्तिदः। इं शान्तिः पोषकशक्तिप्रदश्च ईं पवित्रता।।1।।
वाक्छक्तिदायकस्तथा उं सर्वशक्तिदायकः। शत्रुनिष्कासनार्थमूमतुल्यशक्तिदस्तथा।।2।।
उद्वेगचंचलताहनृं ॠं शक्तिविशेषदः। सम्मोहकश्च लृं द्वेषकारकश्चैव शत्रुषु ।।3।।
लॄं सम्मोहनशक्तिदः एं सर्वोत्तमपावकः। ऐं चाकर्षणशक्तिद ईशनामस्तथा ओम्।।4।।
पावकश्च सदा औं तु वाक्सिद्ध्याकर्षणप्रदः। पश्वाकर्षणशक्तिदस्त्वं अः मृत्युविनाशकः।।5।।
कं विषमारकश्चैव तथा कल्याणदायकः। खं सर्वोद्वेगनाशकः गं विघ्ननाशकस्तथा।।6।।
घं स्थिरत्वप्रदायकः मारकविषशामकः । ङं निर्दयतया सर्वशत्रुसुखनाशकश्चम्।।7।।
छं च निवारको तथा भूतप्रेतादिबाधां वै। जं तान्त्रिकप्रयोगानां विनाशको महेश्वरः।।8।।
भूतप्रेतादिनाशको झं ञं मृत्युवशीकारः। टं सर्वरोगनाशकः चन्द्रग्रहप्रभावस्य।।9।।
नियन्त्रकस्तथा टं स्याड्डं सर्वविषशामकः। ढं भाग्योदयकारकः णं सर्वसिद्धिदायकः।।10।।
तं आनन्दप्रदायकभाग्यप्रदश्च तथा स्यात्। थं सर्वपुण्यकारकः दं यशस्ख्यातिदायकः।।11।।
धं मारकज्वरहन्तृ नं शान्तियुक्तमोक्षदः। पं सर्वविषनाशकः फं सर्वसिद्धिदायकः।।12।।
बं दुर्व्यसननाशको भूतप्रेतादिहन्तृ भं। मं सर्वशत्रुवशीकृत्, पावको वायुबीजो यम्।।13।।
व्यापकश्च यथाऽग्निर्वै पाचकश्चाग्निबीजो रम्। पृथ्वीबीजन्तु लं तथा लोकानां रक्षकश्च वै।।14।।
अब्बीजं वं विदुः सर्वे तथोदररुजहरः। शं कामपूरकस्तथा धनप्रदायकश्च तत्।।15।।
षं सर्वकर्मफलदं सं सर्वकारणरूपम्। ऐश्वर्यदायकस्तथा वाक्सिद्धिदश्च हं बीजम्।।16।।
खस्य विद्यात्तथा सर्वशक्तिप्रदायकं ळं वै। क्षं तु सर्वप्रकाशकः सर्वपापक्षमकरम्।।17।।
सायं प्रातः प्रयुञ्जानो सर्वपापं नाशयति। देहबन्धाद्विमुच्यत तथा स्यादित्युपनिषत्।।18।।

ॐ आप्यायन्त्विति शान्तिः।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM